Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 2 | ISSN : 2582-0095

# व्याकरणशास्त्रीयपरिभाषालक्षणविमर्शः

**मयंकपाण्डेय**
शोधच्छात्रः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः,नई दिल्ली।

**Article Info**
Volume 5, Issue 2
Page Number : 51-56
**Publication Issue :**
March-April-2022
**Article History**
Accepted : 02 March 2022
Published : 20 March 2022

**सारांशिका-** अस्मिन् शोधप्रबन्धे सर्वादौ मया परिभाषेति पदनिष्ठशक्तिविषयीभूताः के अर्थाः सम्भवन्तीति विविच्य परिभाषापदं योगरूढमिह ग्राह्यमिति सप्रमाणं प्रतिपादितम्।तदनन्तरं परिभाषाभेदाः निरूपिताः।तदनु विभिन्नाचार्याणां परिभाषाविषयकं मतमत्र शोधप्रबन्धे उपस्थाप्य तत्तन्मतानां महता परिश्रमेण मया समीक्षा विहिता।तत्र प्रामुख्येन भूतिकाराणां श्रीमतां विदुषां तात्याशास्त्रिमहोदयानां दुर्गाटीकाकाराणां श्रीमतां हर्षनाथमिश्रमहोदयानाञ्च परिभाषाविषयकं मतमुल्लिख्य दलसार्थक्यं च विचार्य तत्त्वं निष्पादितं । तत्र निष्पन्ने अर्थे भाष्यमपि प्रमाणत्वेन मयोपात्तम्।

**मुख्यशब्दः**–व्याकरणम्, अर्थः, परिभाषा, तत्त्वम्, दुर्गाटीका, हर्षनाथमिश्रः।

सुविदितमेव विदुषां व्याकरणशास्त्रे परिभाषाशास्राणां विधिशास्त्रोपकारकत्वम्। नान्तरेण परिभाषाशास्त्राणि विधिशास्त्रैः लक्ष्याणां संस्कारः कर्तुं शक्यते। विधिशास्त्रैः क्वचित्केषाञ्चिल्लक्ष्याणां परिभाषाशास्त्रमन्तरेण संस्कारजननेऽपि सकललक्ष्यधर्मिकसाधुत्वप्रकारकबोधस्य परिभाषाधीनत्वात् परिभाषास्वरूपस्यावश्यं निरूपणीयतया विविधग्रन्थेषु विद्यमानानि परिभाषालक्षणान्याश्रित्य तेषां यथामति समीक्षा अत्र शोधपत्रे प्रस्तूयते।

तत्र परिभाषापदार्थः कः ? इत्ययं प्रश्नः समेषां प्रतिपित्सूनां मनसि जायत एव । तथाहि – परिभाष्यते बोध्यते यया इति व्युत्पत्तिमाध्यमेन लक्षणरूपार्थः प्रतीयते। यथा श्रीमद्भगवद्गीतायाः द्वितीयाध्यायस्य चतुष्पञ्चाशत्तमे श्लोके – **स्थितप्रज्ञस्य का भाषा समाधिस्थ केशव। स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम्।।** इत्यत्र भाषाशब्दः लक्षणपर्याये एव वर्तते अर्थात् स्थितप्रज्ञस्य किं लक्षणमिति मनसि निधाय स्थितप्रज्ञस्य का भाषा इति निगदितम्। प्रस्तुतेऽस्मिन् उदाहरणे भाषाशब्दसत्वेपि परिभाषाशब्दस्य अभावात् कथं इदं दृष्टान्तरूपेण उपात्तमिति तु न शङ्कनीयम् यतोहि परिभाषा शब्दस्यैव सत्वात्।कथं तर्हि परि इत्युपसर्गो न श्रूयते? इति चेत् विनापि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः इत्यनुशासनेन 'प्रति'इति पूर्वपदस्य लोपात् भाषा इत्येव श्रूयते ।किञ्च कश्चित् कर्मणः का परिभाषा इति पृच्छति चेत् समाधाता कर्मणः लक्षणमेव वदति।एतावता परिभाषाशब्दस्य अर्थः लक्षणमित्येव आगतम्। परन्तु व्याकरणशास्त्रे परिभाषाशब्दः यौगिको नास्ति , अपितु योगरुढः वर्त्तते। तथाहि परिभाषाशास्त्रेण समुचितशब्दसन्निवेशसङ्कोचादिना किमपि विधिसूत्रं तेन रूपेण प्रवर्त्यते येन साधुशब्दानां सिद्धिःभवति। एवञ्च विधिसूत्राणां प्रवृत्तिरूपः निवृत्तित्तिरूपश्च परिभाषाभाषाशास्त्रवृत्ति व्यापारः।**परितो भाषते या सा परिभाषा प्रकिर्तिता।परितो व्यापृतां भाषां परिभाषां प्रचक्षते।।** इति अभियुक्तोत्या पर्युपसर्गपूर्वकात् भाष्धातोः घञ्प्रत्ययेन निष्पन्नस्य परिभाषेति शब्दस्य योगरूढत्वमेव स्वीकार्यम्। अस्मादेव कारणात् अधिकरो नाम त्रिप्रकारकः कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति इति भाष्ये कश्चिद् इति पदस्य परिभाषारूपः अर्थः स्वीकृतो वर्तते। परिभाषाशब्दस्य योगार्थमात्रस्वीकारे

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

तु सञ्ज्ञानियमाधिकारेषु लक्षणस्य अतिव्याप्ति: स्यात् । अत एव श्रीमता विदुषा भैरवमिश्रणोक्तं यत् परिभाषापदस्य च **परतो भाष्यते या सा परिभाषेति व्यापृत्तिरूपस्य रूढ्यर्थतावच्छेकस्यापि सम्भवात् परिभाषापदम् आसु योगरूढमिह बोध्यम् न तु यौगिकमेव सञ्ज्ञायामतिव्याप्ते**:। परिभाषणशब्दे यौ धातूपसर्गौ वर्तेते तावेव धातूपसर्गौ परिभाषा शब्देपि दृश्येते। परिभाषणपरिभाषाशब्दयो: प्रत्ययभेद: वर्तते इति विशेष:। अर्थात् केवलं प्रत्ययभेद: उभयो: वर्तते। परिभाषणशब्दे ल्युट्प्रत्यय: वर्तते। परिभाषाशब्दे तु घञ्प्रत्ययोऽस्ति। किन्तु प्रत्ययभेदेऽपि उभौ समानमेवार्थं बोधयत:। **य: सनिन्द: उपालम्भस्तत्र स्यात् परिभाषणम्** इति कोशवचनात् सनिन्दोपालम्भार्थक: परिभाषा शब्दार्थ: ।

तथाहि–परिभाषा नाम अनियमे नियमकारिणी अर्थात् अनियमे सति यया नियम: क्रियते सा परिभाषा भवति। अत्र नियमत्वन्नाम विधिशास्त्रस्य निन्दा।यथा **अतो भिस ऐस्** इति सूत्रेण अत: परस्य भिस: ऐसादेशो विधीयते। स च ऐसादेश: किम् इकारस्य स्थाने स्यात्, भकारस्य स्थाने स्यात्, सकारस्य स्थाने वा स्याद् अथवा सम्पूर्णस्य भिस: स्थाने स्यादिति निश्चयो नास्ति। यत: निश्चयो नास्ति अत: अतो भिस ऐस् इति विधिसूत्रेण विधीयमानो विधि: निन्दनीय: वर्तते। अनेकाल्शित्सर्वस्य इति परिभाषा च सर्वस्य इति पदम् अतो भिस ऐस् इत्यादौ उपस्थाप्य अत: परस्य सर्वस्य भिस ऐस् आदेश: स्यात् इति निश्चयं जनयति। अनिश्चये सति निश्चयजननञ्च प्रकारान्तरेण सनिन्दोपलम्भ:।तत्र अनिश्चयांशो निन्दा निश्चयांशश्चोपलम्भ: इति।

**परिभाषाभेदा:-** पाणिनीये व्याकरणे द्विविधा परिभाषा अस्माभिरवलोक्यते। एका साक्षात् भगवता पाणिनिना विधिशास्त्रीयाप्रामाण्यज्ञानानास्कन्दितबोधसम्पत्तये विरचिता **इकोगुणवृद्धी** इत्यादिरूपा अपरा ज्ञापिता । यथा सुप्तिङन्तं पदमिति सूत्रे अन्तग्रहणेन सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति इति परिभाषा ज्ञाप्यते। इयमस्ति ज्ञापिता परिभाषा। इमौ भेदौ सारल्येन अस्माभि: द्रष्टुं शक्यते। परन्तु दत्तावधानेन विचारयामश्चेत् परिभाषाणां पुन: द्वैविध्यं वयं द्रष्टुं शक्नुम:। तद्यथाशास्त्रमात्रविषया परिभाषा शस्त्रलोकोभयविषया च परिभाषा। तत्र प्रथमा अलोन्त्यस्य,तस्मादित्त्युत्तरस्य, आदे: परस्य इत्यादिरूपा । द्वितीया एकदेशविकृतमनन्यवत्,असिद्धं बहिमन्तरङ्गे इत्यादिरूपा च।

**तात्याशास्त्रिमहोदयकृतं परिभाषालक्षणम् –** परिभाषेन्दुशेखरस्य भूतिटीकायां श्रीमता विदुषा तात्याशास्त्रिवर्येण परिभाषेन्दुशेखरपदघटितं परिभाषापदं उररीकृत्य परिभाषाया: लक्षणं निरूपितं वर्तते। तच्च लक्षणं किमिति चेदुच्यते– "सङ्केतग्राहकभिन्नत्वे सति शब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वे सति पाणिन्युच्चरितभिन्नत्वमिति"। इदं खलु लक्षणं पाणिन्युच्चरितभिन्नानाम् एकदेशविकृतमनन्यवत् इत्यादीनामेव बोध्यम्।

**लक्षणसमन्वयप्रकार**: - निर्जरसौ इत्यादिप्रयोगसिद्ध्यर्थम् एका परिभाषा भाष्यकृता अङ्गीकृता वर्तते "**निर्दिश्यमानस्यादेशा भवन्ति**" इति। अस्यां परिभाषायां परिभाषालक्षणसमन्वय: प्रदर्श्यते। तथाहि सङ्केतग्राहकभिन्नत्वरूपं प्रथमं दलं निर्दिश्यमानस्यादेशा भवन्ति इति परिभाषायां वर्तते। यत: तया किमपि सङ्केतं (शक्ति:) न सङ्गृह्यते अर्थात् यथा आदैच् निरूपिताशक्ति: वृद्धिपदे वृद्धिरादैच् इतिसूत्रेण सङ्गृह्यते तथा न निर्दिश्यमानपरिभाषया। एतावता प्रथमं दलं परिभाषायां संघटते। अथ शब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वरूपं द्वितीयं दलमपि निर्दिश्यमानपरिभाषायां संघटते, अजादिविभक्त्यव्यवहितपूर्वत्वविशिष्टस्य जरापदीयनिर्दिश्यमानस्य स्थाने जरसादेश: स्यात् तद्घटितश्च शब्द: साधुरिति लक्ष्यसंस्कारकशब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वात् । अथ पाणिन्युच्चरितभिन्नत्वरूपं तृतीयं दलमपि निर्दिश्यमानपरिभाषायां वर्तते यत: इको गुणवृद्धी इतिवत् भगवता पाणिनिना निर्दिश्यमानस्यादेशा भवन्ति इति कुत्रापि नोक्तं वर्तते। एतावता पूर्वोक्तदलत्रयस्य निर्दिश्यमानस्या आदेशा भवन्ति इति वाक्ये सत्वेन भवति लक्षणसमन्वय:।

**दलसार्थक्यविचारः –** परिभाषालक्षणे समागतानां दलानां तदन्तर्गतानाञ्च दलानां सार्थक्यमिदानीं विचार्यते। तथाहि – परिभाषालक्षणं यदि सङ्केतग्राहकभिन्नत्वे सति शब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वम् इत्येव क्रियते , अर्थात् पाणिन्युच्चरितभिन्नत्वरूपं प्रथमं दलं न निवेश्यते तदा शेषे इति अधिकारे अतिव्याप्तिः स्यात् । कथम् अतिव्याप्तिरिति किञ्चित् प्रतिपाद्यते – भगवता पाणिनिना एकम् अधिकारसूत्रं विरचितं शेषे इति। अत्र सूत्रे पूर्वोक्तं परिभाषालक्षणघटकदलद्वयं संघटते। तयोः दलयोः सङ्केतग्राहकभिन्नत्वरूपं प्रथमं दलं शेषे इत्यत्र वर्तते हलन्त्यमित्यादिना इव न हि कुत्रचित् शेषे इति सूत्रेण संङ्केतो गृह्यते। अथ च शेषे इत्यस्य अपत्यादिचतुर्थ्यन्तादन्येषु अर्थेषु अणादयः भवन्ति इति लक्ष्यसंस्कारशब्दधर्मिकसाधुत्वप्रकारक'शेषे'इतिशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वात् , लक्ष्यसंस्कारकशब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रमाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वरूपं द्वितीयं दलञ्च संघटते। एतावता दलद्वयात्मकस्य " सङ्केतग्राहकभिन्नत्वे सति शब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वम्" इत्यस्य परिभाषालक्षणस्य शेषे इत्यत्र भवति अतिव्याप्तिदोषः। अतस्तद्दोषवारणाय परिभाषालक्षणे पाणिन्युच्चरितभिन्नत्वं निवेश्यते। तन्निवेशे च सति भवति अतिव्याप्तिदोषवारणं , तत् कथमिति किञ्चिन्निरूप्यते – तथाहि– शेषे इत्यत्र पूर्वोक्तदलद्वयस्य सत्वेपि पाणिन्युच्चरितभिन्नत्वरूपस्य तृतीयस्य दलस्य अभावात् शेषे इत्यत्र जायमानातिव्याप्तिदोषस्य वारणं भवति। यदि च सङ्केतग्राहकभिन्नत्वे सति पाणिन्युच्चरितभिन्नत्वरूपं परिभाषालक्षणं स्वीक्रियते तदा यद्यपि शेषे इत्यत्र अतिव्याप्तिः न भवति किन्तु घटपटादिरूपे अर्थे अतिव्याप्तिः स्यात् । कथमतिव्याप्तिरिति किञ्चिन्निरूप्यते। तथाहि " अ अ ’’ इत्यादाविव सङ्केतग्राहकभिन्नत्वस्य "**सन्निपातलक्षणो विधिरनिमित्तं तदविघातस्य**" इत्यादाविव पाणिन्युच्चरितभिन्नत्वस्य च पटादिरूपे अर्थे सत्वात् सङ्केतग्राहकभिन्नत्वे सति पाणिन्युच्चरितभिन्नत्वरूपस्य परिभाषालक्षणस्य अतिव्याप्तिप्रसङ्गः समापतति। अतस्तद्दोषवारणाय परिभाषालक्षणे लक्ष्यसंस्कारकशब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वरूपं दलं निवेश्यते। तन्निवेशे च सति घटपटादिरूपे अर्थे कथमतिव्याप्तिदोषवारणमिति स्पष्टीक्रियते। तथाहि– दलद्वयात्मकस्य सङ्केतग्राहकभिन्नत्वे सति पाणिन्युच्चरितभिन्नत्वरूपस्य परिभाषालक्षणस्य घटपटादिरूपे अर्थे सत्वेपि लक्ष्यसंस्कारकशब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रमाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वरूपस्य द्वितीयस्य दलस्य तत्राभावात् भवति अतिव्याप्तिदोषवारणम्। अस्तु तर्हि शेषे इत्यत्र अतिव्याप्तिवारणाय पाणिन्युच्चरितभिन्नत्वरूपं दलं अथ च घटपटादिरूपे अर्थे अतिव्याप्तिवारणाय लक्ष्यसंस्कारक–शब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रमाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वरूपं दलं किन्तु सङ्केतग्राहकभिन्नत्वरूपस्य दलस्य किं प्रयोजनमिति जिज्ञासा तु भवत्येव। आस्यां जिज्ञासायाम् उच्यते यत् "द्विपर्यन्तानामेवेष्टिः" इति भाष्योक्तसङ्केतग्राहके वचने अतिव्याप्तिवारणार्थं तत्। अर्थात् द्विपर्यन्तानामेवेष्टिः इति वचने पाणिन्युच्चरितभिन्नत्वरूपस्य दलस्य लक्ष्यसंस्कारकशब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रमाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वरूपस्य च दलस्य सत्वात् अतिव्याप्तिदोषः समागतःवर्तते तद्वारणाय श्रीमता विदुषा तात्याशास्त्रिवर्येण सङ्केतग्राहकभिन्नत्वरूपं दलं दत्तम्। एतावता दलत्रयात्मकं परिभाषालक्षणं निर्दुष्टम्। अस्मिन् लक्षणे लक्ष्यसंस्कारकशब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वरूपस्य दीर्घीभूतस्य द्वितीयस्य दलस्य स्थाने शास्त्रजन्यबोधे सहकारितत्वेन मुन्यभिप्रेतत्वमित्येव कुतो न लिखितमिति अर्थात् शास्त्रजन्यबोधे शब्दधर्मिकसाधुत्वप्रकारकत्वमथ च अप्राण्यज्ञानानास्कन्दितत्वञ्चेति विशेषणद्वयं कुतो निवेश्यते ,इति चेत् अव्याप्तिदोषवारणाय। अर्थात् शास्त्रजन्यबोधेपूर्वोक्तविशेषणद्वयनिवेशाभावे निर्दिश्यमानस्यादेशा भवन्ति इत्यत्र अव्याप्तिः स्यात्। तथाहि– जरायाः जरसन्यतरस्यामित्यत्र सूत्रघटकपदनिष्ठशक्तिज्ञानसत्वे तत्तत्पदैः पदार्थोपस्थितौ उपास्थितपदार्थानां

परस्परसंसर्गेण जराशब्दान्तस्य स्थाने जरसादेशः स्यादजादौ विभक्तौ इति जराया जरसन्यतरस्यामिति सूत्रजबोधस्स्यात्। अयञ्च बोधः नैतत्सूत्रीयसकललक्ष्यधर्मिकसाधुत्वप्रकारकः। स्त्रीत्वविवक्षायां जरा औ इति स्थिते जराशब्दस्य व्यपिदेशिवद्भावेन जराशब्दान्तत्वमादाय जरसादेशविधानेन यत्किञ्चिच्छब्दधर्मिकसाधुत्वप्रकारकत्वस्य पूर्वोक्तबोधे सत्वेऽपि निर्जरसौ इत्यादौ सम्पूर्णस्य जराशब्दान्तस्य निर्जरेत्यस्य स्थाने जरसादेशापत्या न सकललक्ष्यधर्मिकसाधुत्वप्रकारकत्वं पूर्वोक्तबोधस्य एवमेव तदोः सः सावनन्त्ययोः इति सूत्रे त्यदादीनामः इत्यस्यानुवृत्या त्यदादीनामित्यस्य अङ्गविशेषणत्वे अभेदसम्बन्धावच्छिन्नप्रकारताप्रयोजकत्वस्य सत्वात् येन विधिस्तदन्तस्य इति सूत्रेण तस्य तदन्तोपस्थापकत्वात् त्यदाद्यन्ताङ्गावयवयोः अनन्त्ययोः तदोः स्थाने सः स्यात् सौ इत्यर्थस्यैव जायमानत्वात् अतिशयितः स्यः अतिस्यः इत्यत्रोपसर्गतकारस्यापि सत्वापत्या न तदोः सः सावनन्त्ययोः इति पूर्वोक्तबोधस्य स्वकीयसकललक्ष्यधर्मिकसाधुत्वप्रकारकत्वं स्यात्। अतः शास्त्रजन्यबोधे शब्दधर्मिकसाधुत्वप्रकारकत्वं निवेशितम्।तन्निवेशे च जरायाः जरसन्यतरस्यामिति शास्त्रजन्यलक्ष्यधर्मिकसाधुत्वप्रकारकबोधः अजादिविभक्त्यव्यवहितपूर्वत्वविशिष्टस्य जरापदीयनिर्दिश्यमानस्य स्थाने जरसादेशः तदादेशघटितस्य शब्दः साधुरिति। एवञ्च अस्मिन् बोधे निर्दिश्यमानपदार्थस्य विषयतया प्रविष्टत्वेन तदुपस्थापकतया निर्दिश्यमानपरिभाषायाः तादृशबोधं प्रति कारणत्वं संघटते अतो नाव्याप्तिः। एवमेव तदो सः सावन्तययोः इति सूत्रस्य त्यदाद्यन्तं यदङ्गं तदवयवस्य निर्दिश्यमानस्य अन्त्यस्य तकारस्य दकारस्य च स्थाने सः स्यात् सौ इत्यर्थः स्यात् । एवञ्चास्मिन् बोधे निर्दिश्यमानपदार्थस्य प्रविष्टत्वेन तदुपस्थापकतया निर्दिश्यमानपरिभाषायाः तादृशबोधं प्रति कारणत्वं संघटते अतो नाव्याप्तिः। किन्तु लक्षणमिदन्न निर्दुष्टं यतोहि कासाञ्चित् स्वातन्त्र्येण व्यवस्थापिकानाम् असिद्धं बहिरङ्गमन्तरङ्गे इत्यादीनां शब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाणिकज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वाभावात् पूर्वोक्ते लक्षणस्यात्र अगमनात् अव्याप्तिप्रसङ्गः स्यात्। यद्यत्र च परिभाषात्वसिद्धये पाणिनिप्रयत्नानुमितत्वसादृश्यारोपितपरिभाषात्वं स्वीक्रियते तर्हि सुतरामेव गौरवम्। अतः सर्वविधपरिभाषासाधारणं लक्षणं कुर्वता हर्षनाथमिश्रमहोदयेनोक्तं लिङ्गत्वे सति नियामकत्वं परिभाषात्वमिति।

**हर्षनाथमिश्रमहोदयानां परिभाषालक्षणविषयकमतोपस्थापनम्-** हर्षनाथमिश्रमहोदयेन लिङ्गवत्वे सति नियामकत्वं परिभाषात्वमिति स्वीकृतम् वर्तते। एतेषां मते नियामकत्वमित्यस्यानियमे नियमकारिणीत्वमित्यर्थः । अत एव अनियमे नियमकारिणी परिभाषेति वृद्धोक्तव्यवहारोऽपि सङ्गच्छते।अनियमत्वं नाम न्यूनाधिकवृत्तित्वम्। परिभाषाशास्त्रं हि अलक्ष्ये लक्ष्यैकदेशे वा प्रवर्तमानं तत्तद्विधिशास्त्रं नियम्य यथालक्षणं यथादेशं वा प्रवर्तयति। इयञ्च परिभाषा स्वलिङ्गं दृष्ट्वा स्वलिङ्गलिङ्गितविधिसूत्रेषु प्रवर्तते। अतः परिभाषा लिङ्गवतीति उच्यते। यथा औपश्लेषिकाधिकरणबोधकोच्चरितसप्तम्यन्यरूपलिङ्गं दृष्ट्वा तस्मिन्निति निर्दिष्टे पूर्वस्य इति परिभाषा प्रवर्तते। प्रवर्त्य च इको यणचि इति सूत्रघटकाचि इत्यत्र औपश्लेषिकाधिकरणवाचकसप्तम्यन्तपदस्य सत्वात् अजुपश्लिष्टस्येकः स्थाने यण् स्यादित्यर्थं सम्पादयति। एवञ्च उपश्लेषस्य पूर्वापरव्यवहिताव्यवहितोभयसाधारणतया सुधी उपास्य इत्यत्रेकाररूपाजुपश्लिष्टस्य उपास्यघटकस्य उकारस्य इक्पदबोध्यतया तस्य स्थाने यणादेशो प्राप्तः। एवमेव सुधीघटकः उकारः अच्पदबोध्यः तदुपश्लिष्टः इक्पदबोध्यः सुधीशब्दघटकधकारोत्तरवर्तीकारः तस्यापि स्थाने यण् प्राप्तः। एवमेव अच्पदबोध्यः उपास्यशब्दघटकपकारोत्तरवर्त्याकारः उपास्यघटकोकारस्यापि यणादेशः प्राप्तः। एतावता इको यणचि इति सूत्रम् अलक्ष्ये गन्तुं प्रवृत्तं, तं तस्मिन्निति निर्दिष्टे पूर्वस्य इति परिभाषा वारयति। तथाहि तस्मिन्निति निर्दिष्टे पूर्वस्य इति परिभाषा निर्दिष्टे पूर्वस्येति पदद्वयोपस्थापनेन इको यणचि इति शास्त्रस्य अव्यवहितपूर्वत्वविशिष्टस्येकः स्थाने यण् स्यात् इत्यर्थं सम्पादयति। तेन अजुपश्लिष्टस्य व्यवहितस्य परस्य च यणादेशो न प्राप्नोति। एवञ्च पूर्वोक्तरीत्या यणादेशविधौ अनियमः आसीत् , स अनियमःअनया निरस्य नियमत्वं सम्पादितम् । अतो अनियमे नियमकारित्वेन तस्मिन्निति शास्त्रस्य परिभाषात्वं सम्पद्यते।एवमेव

पचावेदमित्यत्र गुणे कृते एकादेशस्य यः पूर्वस्थानी यश्च परस्थानी तद्घटितो यः समुदायः तद्वृत्तयो ये धर्माः ते कृतैकादेशेपि अतिदिश्यन्ते इत्यर्थकेन अन्तादिवच्च इति शास्त्रे एकादेशस्य पूर्वस्थानिवृत्तिलोट्सम्बन्धित्वम् एकादेशविशिष्टे एकारे अतिदिश्य लोट्सम्बन्धिन एकास्यैकारः स्यात् इत्यर्थकेन "**एत ऐ**" इति सूत्रेण ऐत्वं प्राप्तम् परन्तु असिद्धं बहिमन्तरङ्गे इति परिभाषया अन्तरङ्गरूपं लिङ्गं दृष्ट्वा बहिरङ्गुणम् असिद्धं विधाय "एत ऐ" इत्येतच्छास्त्रं नियम्यते । एवञ्च विधिशास्त्रप्रवृत्तिनिवृत्तयुपयोगिसाधुत्त्वाप्रकारकशक्त्यविषयकबोधजनकत्वे सति अधिकारभिन्नत्वं परिभाषात्वमिति लक्षणं पर्यवस्थितम् । अत्र लक्षणे यदि बोधे शक्त्यविषयत्वं न दीयते तथा सति विधिशास्त्रप्रवृत्तिनिवृत्त्युपयोगिसाधुत्त्वाप्रकारकबोधजनकत्वविशिष्टाधिकारभिन्नत्वस्य वृद्धिरादैच् इति सञ्ज्ञासूत्रे अपि सत्वेन अतिव्याप्तिदोषः समागच्छति अतस्तद्दोषवारणाय परिभाषालक्षणघटकबोधे शक्त्यविषयकत्वमिति विशेषणं दीयते तद्दाने च वृद्धिरादैच् इति सूत्रस्य शक्तिविषयकबोधजनकत्वान्नातिव्याप्तिदोषः।यदि च तस्मिन् बोधे साधुत्वाप्रकारकत्वं विशेषणं न दीयते तथा सति अपवादे अतिव्याप्तिः स्यात् , अतस्तद्दोषवारणाय साधुत्वाप्रकारकत्वं विशेषणं दत्तम्। अपवादशास्त्रस्य तु साधुत्वप्रकारकबोधजनकत्वात् तत्र नातिव्याप्तिदोषः । अधिकारसूत्रे अतिव्याप्तिवारणाय अधिकारभिन्नेति दलं दत्तम्।

**हर्षनाथमिश्रमतसमीक्षणम् -** परमवैयाकरणैः मिश्रपादैः लिङ्गवत्वे सति नियामकत्वं परिभाषात्वमिति स्वीकृतम् । ननु अत्र लक्षणे लिङ्गवत्वमित्यर्थः विवक्षितः वर्तते। स च लिङ्गवत्वरूपोर्थः न तस्मिन्निति निर्दिष्टे पूर्वस्य इत्यत्र घटते यतो हि तस्मिन्निति निर्दिष्टे पूर्वस्य इति परिभाषायाः लिङ्गम् औपश्लेषिकाधिकरणसप्तमीति। तच्च लिङ्गम् इको यणचि इत्यादौ अच्पदोत्तरसप्तमीरूपम्। सा च सप्तमी घटितत्वसम्बन्धेन यण्विधायके सूत्रे वर्तते अर्थात् घटितत्वसम्बन्धेन औपश्लेषिकाधिकरणसप्तमीरूपलिङ्गनिष्ठाधेयतानिरूपिताधिकरणतायाः इको यणचि इत्यत्र सत्वेऽपि तस्मिन्निति निर्दिष्टे पूर्वस्य इत्यत्र अभावात् परिभाषात्वानापत्तिरिति वाच्यमिति चेन्नात्र आधेयतावच्छेदकः सम्बन्धः घटितत्वसम्बन्धोऽपितु स्वप्रयुक्तप्रवृत्तियोग्यत्वरूपः सम्बन्धः गृह्यते। एवञ्च स्वं लिङ्गं तत्प्रयुक्तप्रवृत्तियोग्यत्वसम्बन्धावच्छिन्नलिङ्गनिष्ठाधेयतानिरूपिताधिकरणतावत्वं लिङ्गवत्वम्। यथा- तस्मिन्निति निर्दिष्टे पूर्वस्य इति परिभाषायाः लिङ्गम् अचि इति अच्पदोत्तरभूता औपश्लेषिकाधिकरणसप्तमी , तत्प्रयुक्तप्रवृत्तियोग्या तस्मिन्निति निर्दिष्टे पूर्वस्य इति परिभाषा अतस्तत्त्वस्य परिभाषायां सत्वान्न परिभाषात्वानापत्तिरूपः दोषः। एतावता सकलशास्त्रप्रवृत्तियोग्यत्वमेव लिङ्गवत्वम्। यद्यपि इको यणचि इत्यादिविधिशास्त्राणामपि स्वीयोद्देश्यतावच्छेदकावच्छिन्ने प्रवृत्तिरिति नियमात् अजव्यवहितपूर्वत्वविशिष्टम् इक्त्वरूपं तत्प्रवृत्तिलिङ्गं , तदेव च उद्देश्यतावच्छेदकम् ,एवञ्च स्वप्रयुक्तप्रवृत्तियोग्यत्वसंम्बन्धेन उद्देश्यतावच्छेदकरूपलिङ्गस्य विधिशास्त्रादावपि सत्वेन अतिव्याप्तिदोषः प्रतीयते तथापि स्वप्रवृत्तिलिङ्गमुद्देश्यतावच्छेदकं न सूत्रगतमपितु लौकिकप्रयोगगतमिति न विधिसूत्रादौ अतिव्याप्तिः।

**परिभाषाविषयकभाष्यकारमतम्-** यद्यपि भगवता पतञ्जलिना कुत्रापि परिभाषा लक्षणं नोक्तं वर्तते तथापि तेषां भगवतां प्रतिपादनशैल्या प्रतीयते यत् परिभाषा प्रकाशिका भवति इति तदभिमतम्। परिभाषा स्वव्यापारद्वारा सूत्रार्थं प्रकाशयति जनयततीति। अधिकारपरिभाषयोः भेदनिरूपणावसरे भाष्यकृता समर्थः पदविधिः इति सूत्रे उक्तं यत् "कः पुनरयमधिकारपरिभाषयोर्विशेषः? अधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे उपतिष्ठते। परिभाषा पुनरेकदेस्था सती कृत्स्नं शास्त्रमभिज्वलयति प्रदीपवत्।तद्यथा - प्रदीपः सुप्रज्वलित एकदेशस्थः सर्वं वेश्माभिज्वलयति"इति। अनेन च भाष्येण मदुक्तं प्रमाणीक्रियते। हरदत्तेन तु "परितः सर्वत्र पूर्वत्र परत्र व्यवहिते नानन्तरे च भाष्यते कार्यमनया सा परिभाषा" इति उक्तम्।

**सन्दर्भग्रन्थसूची –**


1. परिभाषेन्दुशेखरः भूतितिलकव्याख्यानम्
2. परिभाषेन्दुशेखरः विजयाटीका
3. परिभाषेन्दुशेखरः भैरवीटीका
4. परिभाषेन्दुशेखरः दुर्गाव्याख्यानम्
5. श्रीमद्भगवद्गीता शाङ्करभाष्यम्
6. अमरकोशः
7. शब्दकल्पद्रुमः
8. पाणिनीयाष्टाध्यायी
9. पातञ्जलमहाभाष्यम्
10. सिद्धान्तकौमुदी
11. लघुशब्देन्दुशेखरः
12. अष्टाध्यायी काशिकाव्याख्यानम्